विवेकिनो महीपालाः पालयन्ति यथा प्रजाः ।
तथा तानपि देवेशः पालयत्यनिशं हरिः ॥
प्रजानां पालनं दानं द्वेऽपि राज्ञां शुभावहे ।
द्वाभ्यां ये वर्जिता भूपास्ते विज्ञेया नृपाधमाः ॥
दुष्टानां शासनञ्चैव शिष्टानां प्रतिपालनम् ।
प्रकुर्व्वन्तो महीपालाश्चिरं नन्दन्ति भूतले ॥
न्यायेनोपार्ज्जितं वित्तं यत्नाद्रक्षेन्महीपतिः ।
निर्व्वित्तो हि महीपालो विपत्तौ न हि निस्त-
रेत् ॥
नृपाः कल्याणमिच्छन्तो निजराज्यशुभाशुभम् ।
पश्यन्ति नित्यं विप्रेन्द्र ! सत्वराश्चारचक्षुषः ॥
परचक्रभयं यावत् नायाति चिन्तयेद्भयम् ।
आगते तु भये भूप आचरेन्निर्भयो यथा ॥
ज्ञातौ वापि च मित्रे वा पुत्त्रे वापि च मन्त्रिणि ।
कुर्य्यान्मुखेन गाम्भीर्य्यं मनसा प्रेम केवलम् ॥
मन्त्रिणो ज्ञातयः पुत्त्राः प्रजाश्च भ्रातरस्तथा ।
गाम्भीर्य्यहीनं भूपालं मन्यन्ते न हि भूपवत् ॥
तिष्ठन्ति प्रथमं दूरे वसन्ति पुरतस्तदा ।
लोकाः श्रियं यदिच्छन्ति त्यक्तगाम्भीर्य्यभूपतेः ।
एकस्य मन्त्रिणो राज्ञा चिरं राजत्वमिच्छता ।
कर्त्तव्याः सकले राज्ये वृद्धयो नैव भूसुर ॥
अत्यन्तलब्धवृद्धीनां भृत्यानां सम्पदं हरेत् ।
तस्यां सम्पदि भूपालो भृत्यमन्यं नियोजयेत् ॥
मूर्खः स्त्रीविजितो राजा गीतवाद्यरतः सदा ।
चतुरङ्गबलैर्हीनः सहसा विपदं व्रजेत् ॥
स्वाचारग्रहणं सत्त्वं स्ववाक्यप्रतिपालनम् ।
गाम्भीर्य्यञ्चेति भूपानां लक्षणानि द्विजोत्तम ! ॥
स कथं नृपतिर्यस्तु प्रतापेन विवर्ज्जितः ।
स कथं नृपतिर्येन न जिता परमेदिनी ॥
जितायां परमेदिन्यां यावत् पादं व्रजेन्नृपः ।
प्रतिपादेऽश्वमेधस्य फलं प्राप्नोति चाक्षयम् ॥
परभूमिजयाकाङ्क्षी हतो वा नृपतिर्युधि ।
तदा गच्छेत् परं धाम विमुक्तः सर्व्वपातकैः ॥
युधि प्राप्तजयो राजा प्राप्नोति परमं पदम् ।
स साहसप्राप्तलक्ष्मीर्देवेन्द्रसम्पदं लभेत् ॥
त्यक्तसत्त्वं त्यक्तशस्त्रं पलायनपरायणम् ।
योद्धारं युधि यो हन्यात् स भूपो याति घो-
रगतिम् ॥
पलायनपरो युद्धे तद्धन्ता च द्विजोत्तम ! ।
तावुभावपि तिष्ठेतां नरकेऽत्यन्तदुःखदे ॥
युधि साहसवान् योद्धा तद्धन्ता च महीसुर ।
तिष्ठेतां तावपि स्वर्गे यावच्चन्द्रदिवाकरौ ॥
बहुनात्र किमुक्तेन संक्षेपादुच्यते मया ।
प्रजापालनकृद्राजा कदाचिन्नावसीदति ॥”
इति पाद्मे क्रियायोगसारे २० अध्यायः ॥

राजनीलं, क्ली, मरकतमणिः । इति शब्दरत्ना-
वली ॥

राजन्यः, पुं, (राज्ञोऽपत्यमिति । राजन्+
“राजश्वशुराद् यत् ।” ४ । १ । १३७ । इति
यत् ।) क्षत्त्रियः । इत्यमरः ॥ (यथा, ऋग्वेदे ।
१० । ९० । १२ ।
“ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥”)
राजपुत्त्रः । (राजति दीप्यते इति । राज्+
“राजेरन्यः ।” उणा० ३।१०० । इति अन्यः ।)
अग्निः । इत्युणादिकोषः ॥ क्षीरिकावृक्षः ।
इति जटाधरः ॥

राजन्यकं, क्ली, (राजन्यानां क्षत्त्रियाणां समूहः ।
राजन्य + “गोत्रोक्षोष्ट्रोरभ्रराजराजन्येति ।”
४।२।३९। इति वुञ् ।) क्षत्त्रियसमूहः । इत्य-
मरः ॥ (यथा, रघुः । ७ ।५६ ।
“रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ।
निवारयामास महावराहः
कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥”*॥
राजन्यानां विषये देशे च पुं । इति काशिका ॥
अत्र “राजन्यादिभ्यो वुञ् ।” ४ । २ । ५३ ।
इति वुञ्प्रत्ययः ॥)

राजन्वान्, त्रि, (राजास्यास्मिन्निति वा । राजन्
+प्रशंसायां मतुप् । “राजन्वान् सौराज्ये ।”
८ । २ । १४ । इति निपातनात् नलोपाभावः ।)
सुराजयुक्तदेशः । इत्यमरः ॥ “प्रजापालनादि-
स्वधर्म्मपरायणराजयुक्ते देशे राजन्वान् राजा
विद्यतेऽस्येति मोक्षभयादिति प्रशंसायां वतुः ।
यदुक्तं तन्त्रान्तरे ।
‘भूम्नि निन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥’ इति
स्वमते अक्षय्यर्थे भमादयोऽमी अर्था अर्थास्तु
लभ्यन्त एव । निपातनान्नलोपाभावः । न
सौराज्ये राज्ञो नस्य लुक्स्यादिति परे । सुराज्ञि
स्वधर्म्मपरत्वात् शोभना राजानोऽत्रेति
नाधीयां स्वतेरिति अनिषेधः । देशो लोकोप-
लक्षणं सुराज्ञि लोके इत्यर्थः ।” इति तट्टीकायां
भरतः ॥ (यथा, रघुः । ६ । २२ ।
“कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥”)

राजपटोलः, पुं, (पटोलानां राजा । पर-
निपातः ।) मधुरपटोलः । इति रत्नमाला ॥

राजपटोली, स्त्री, (राजप्रिया पटोली ।) मधुर-
पटोली । इति राजनिर्घण्टः ॥

राजपट्टः, पुं, (राजप्रियः पट्ट इव ।) मणि-
विशेषः । तत्पर्य्यायः । विराटजः २ । इति
त्रिकाण्डशेषः ॥

राजपट्टिका, स्त्री, चातकपक्षी । इति हारा-
वली ॥

राजपथः, पुं, (राज्ञां पन्थाः । “ऋक्पूरब्धूःपथा-
मानक्षे ।” ५ । ४ । ७४ । इत्यः ।) राजमार्गः ।
तस्य लक्षणं यथा,—
“धनूंषि दश विस्तीर्णः श्रीमान् राजपथः कृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥”
इति देवीपुराणम् ॥
(यथा, कुमारसम्भवे । ७ । ६३ ।
“तावत्पताकाकुलमिन्दुमौलि-
रुत्तोरणं राजपथं प्रपेदे ॥”)

राजपर्णी, स्त्री, प्रसारिणी लता । इति राज-
निर्घण्टः ॥

राजपलाण्डुः, पुं, (पलाण्डूनां राजा । राज-
दन्तादित्वात् परनिपातः ।) रक्तवर्णपलाण्डुः ।
लाल पेँयाज इति भाषा ॥ तत्पर्य्यायः । यव-
नेष्टः २ नृपाह्वयः ३ राजप्रियः ४ महाकन्दः ५
दीर्घपत्त्रः ६ रोचकः ७ नृपेष्टः ८ नृपकन्दः ९
महाकन्दः १० नृपप्रियः ११ रक्तकन्दः १२
राजेष्टः १३ । अस्य गुणाः । शिशिरत्वम् ।
पित्तकफनाशित्वम् । दीपनत्वम् । बहुनिद्राकर-
त्वञ्च । इति राजनिर्घण्टः ॥

राजपीलुः, पुं, (राजप्रियः पीलुः ।) महापीलु-
वृक्षः । इति राजनिर्घण्टः ॥

राजपुत्त्रः, पुं, (राज्ञश्चन्द्रस्य पुत्त्रः ।) बुधग्रहः ।
इति शब्दरत्नावली ॥ महाराजचूतः । इति
राजनिर्घण्टः ॥ वर्णसङ्करजातिविशेषः । रज-
पुत इति भाषा ॥ यथा,—
“वैश्यादम्बष्ठकन्यायां राजपुत्त्रस्य सम्भवः ॥”
इति पराशरपद्धतिः ॥
करणकन्यायां क्षत्त्रियाज्जातश्च । इति पुरा-
णम् ॥ राजनन्दनः । तत्पर्य्यायः । युवराजः २
कुमारः ३ भर्तृदारकः ४ । इत्यमरः ॥ (यथा,—
“राजपुत्त्र ! चिरं जीव माजीव मुनिपुत्त्रक ! ।
जीव वा मर वा साधो व्याध माजीव मा मर ॥”
इत्युद्भटः ।)
तस्य रक्षणं यथा,—
“राजपुत्त्रस्य रक्षा च कर्त्तव्या पृथिवीक्षिता ।
आचार्य्यश्चास्य कर्त्तव्यं नित्ययुक्तैश्च रक्षणम् ॥
धर्म्मकामार्थशास्त्राणि धनुर्व्वेदञ्च शिक्षयेत् ।
रथे च कुञ्जरे चैनं व्यायामं कारयेत् सदा ॥
शिल्पानि शिक्षयेच्चैव नाप्तैर्मिथ्याप्रियं वदेत् ॥
गुणाधानमशक्यन्तु यस्य कर्त्तुं स्वभावतः ।
बन्धनं तस्य कर्त्तव्यं गुप्ते देशे सुखान्वितम् ॥
अविनीतकुमारं हि कुलमाशु विशीर्य्यते ।
अधिकारेषु सर्व्वेषु विनीतं हि नियोजयेत् ।
आदौ स्वल्पेषु तत्पश्चात् क्रमेणाथ महत्स्वपि ॥
मृगयापानमक्षांश्च वर्ज्जयेत् पृथिवीपतिः ।
एतान्यासेवमानास्तु विनष्टाः पृथिवीक्षितः ॥
बहवो नृपशार्दूला येषां संख्या न विद्यते ॥
वृथाटनदिवास्वप्नं विशेषेण विवर्ज्जयेत् ।
वाक्पारुष्यं न कर्त्तव्यं दण्डपारुष्यमेव च ॥
परोक्षनिन्दा च तथा वर्ज्जनीया महीक्षिता ।
अर्थस्य दूषणं राजा द्विःप्रकारं विवर्ज्जयेत् ॥
अर्थानां दूषणञ्चैव तथा चार्थेषु दूषणम् ।
प्राकारणात् समुच्छेदं दुर्गादीनामसत्क्रिया ॥
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ।
अदेशकाले यद्दानमपात्रे दानमेव च ॥
अर्थस्य दूषणं प्रोक्तमसत्कर्म्मप्रवर्त्तनम् ।
कामं क्रोधं मदं मानं लोभं हर्षं तथैव च ।
जेतव्यमरिषड्वर्गं सादरं पृथिवीक्षिता ॥